शतं दासे बल्बूथे विप्रस्तरुक्ष आ ददे । ते ते वायविमे जना मदन्तीन्द्रगोपा मदन्ति देवगोपाः ॥

The Mantra's transliteration in English

śataṁ dāse balbūthe vipras tarukṣa ā dade | te te vāyav ime janā madantīndragopā madanti devagopāḥ ||

The Pada Paath (Sanskrit)

श॒तम् । दा॒से । ब॒ल्बू॒थे । विप्रः॑ । तरु॑क्षे । आ । द॒दे॒ । ते । ते॒ । वा॒यो॒ इति॑ । इ॒मे । जनाः॑ । मद॑न्ति । इन्द्र॑ऽगोपाः । मद॑न्ति । दे॒वऽगो॑पाः ॥

The Pada Paath - transliteration

śatam | dāse | balbūthe | vipraḥ | tarukṣe | ā | dade | te | te | vāyo iti | ime | janāḥ | madanti | indra-gopāḥ | madanti | deva-gopāḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-046/mantra-rig-08-046-033

MANTRA NUMBER:

Mantra 33 of Sukta 46 of Mandal 8 of Rig Veda
Mantra 8 of Varga 6 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 138 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वशोऽश्व्यः

देवता (Devataa) :- इन्द्र:

छन्द: (Chhand) :- निचृद्गायत्री

स्वर: (Swar) :- षड्जः

THE MANTRA

The Mantra with meters (Sanskrit)

अध॒ स्या योष॑णा म॒ही प्र॑ती॒ची वश॑म॒श्व्यम् । अधि॑रुक्मा॒ वि नी॑यते ॥

The Mantra without meters (Sanskrit)

अध स्या योषणा मही प्रतीची वशमश्व्यम् । अधिरुक्मा वि नीयते ॥

The Mantra's transliteration in English

adha syā yoṣaṇā mahī pratīcī vaśam aśvyam | adhirukmā vi nīyate ||

The Pada Paath (Sanskrit)

अध॑ । स्या । योष॑णा । म॒ही । प्र॒ती॒ची । वश॑म् । अ॒श्व्यम् । अधि॑ऽरुक्मा । वि । नी॒य॒ते ॥

The Pada Paath - transliteration

adha | syā | yoṣaṇā | mahī | pratīcī | vaśam | aśvyam | adhi-rukmā | vi | nīyate

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-047/mantra-rig-08-047-001

MANTRA NUMBER:
Mantra 1 of Sukta 47 of Mandal 8 of Rig Veda
Mantra 1 of Varga 7 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 139 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:
ऋषि: (Rishi) :- त्रित आप्त्यः

देवता (Devataa) :- आदित्याः

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

महि॑ वो मह॒तामवो॒ वरु॑ण॒ मित्र॑ दा॒शुषे॑ । यमा॑दित्या अ॒भि द्रु॒हो रक्ष॑था॒ नेम॒घं न॑शदने॒हसो॑ व ऊ॒तय॑: सु॒तयो॑ व ऊ॒तय॑: ॥

The Mantra without meters (Sanskrit)

महि वो महतामवो वरुण मित्र दाशुषे । यमादित्या अभि द्रुहो रक्षथा नेमघं नशदनेहसो व ऊतयः सुतयो व ऊतयः ॥

The Mantra's transliteration in English

mahi vo mahatām avo varuṇa mitra dāśuṣe | yam ādityā abhi druho rakṣathā nem aghaṁ naśad anehaso va ūtayaḥ suūtayo va ūtayaḥ ||

The Pada Paath (Sanskrit)

महि॑ । व॒ः । म॒ह॒ताम् । अव॑ः । वरु॑ण । मित्र॑ । दा॒शुषे॑ । यम् । आ॒दि॒त्या॒ः । अ॒भि । द्रु॒हः । रक्ष॑थ । न । ई॒म् । अ॒घम् । न॒श॒त् । अ॒ने॒हस॑ः । व॒ः । ऊ॒तय॑ः । सु॒ऽऊ॒तय॑ः । व॒ः । ऊ॒तय॑ः ॥

The Pada Paath - transliteration

mahi | vaḥ | mahatām | avaḥ | varuṇa | mitra | dāśuṣe | yam | ādityāḥ | abhi | druhaḥ | rakṣatha | na | īm | agham | naśat | anehasaḥ | vaḥ | ūtayaḥ | su-ūtayaḥ | vaḥ | ūtayaḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-047/mantra-rig-08-047-002

MANTRA NUMBER:

Mantra 2 of Sukta 47 of Mandal 8 of Rig Veda
Mantra 2 of Varga 7 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 140 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- त्रित आप्त्यः

देवता (Devataa) :- आदित्याः

छन्द: (Chhand) :- भुरिक्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

वि॒दा दे॒वा अ॒घाना॒मादि॑त्यासो अ॒पाकृ॑तिम् । प॒क्षा वयो॒ यथो॒परि॒ व्य१॒॑स्मे शर्म॑ यच्छताने॒हसो॑ व ऊ॒तय॑: सु॒तयो॑ व ऊ॒तय॑: ॥

The Mantra without meters (Sanskrit)

विदा देवा अघानामादित्यासो अपाकृतिम् । पक्षा वयो यथोपरि व्यस्मे शर्म यच्छतानेहसो व ऊतयः सुतयो व ऊतयः ॥

The Mantra's transliteration in English

vidā devā aghānām ādityāso apākṛtim | pakṣā vayo yathopari vy asme śarma yacchatānehaso va ūtayaḥ suūtayo va ūtayaḥ ||

The Pada Paath (Sanskrit)

वि॒द । दे॒वाः॒ । अ॒घाना॑म् । आदि॑त्यासः । अ॒प॒ऽआकृ॑तिम् । प॒क्षा । वय॑ः । यथा॑ । उ॒परि॑ । वि । अ॒स्मे इति॑ । शर्म॑ । य॒च्छ॒त॒ । अ॒ने॒हस॑ः । व॒ः । ऊ॒तय॑ः । सु॒ऽऊ॒तय॑ः । व॒ः । ऊ॒तय॑ः ॥

The Pada Paath - transliteration

vida | devāḥ | aghānām | ādityāsaḥ | apa-ākṛtim | pakṣā | vayaḥ | yathā | upari | vi | asme iti | śarma | yacchata | anehasaḥ | vaḥ | ūtayaḥ | su-ūtayaḥ | vaḥ | ūtayaḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-047/mantra-rig-08-047-003

MANTRA NUMBER:

Mantra 3 of Sukta 47 of Mandal 8 of Rig Veda
Mantra 3 of Varga 7 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 141 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- त्रित आप्त्यः

देवता (Devataa) :- आदित्याः

छन्द: (Chhand) :- भुरिक्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

व्य१॒॑स्मे अधि॒ शर्म॒ तत्प॒क्षा वयो॒ न यन्तन । विश्वा॑नि विश्ववेदसो वरू॒थ्या॑ मनामहेऽने॒हसो॑ व ऊ॒तयः॑ सु॒तयो॑ व ऊ॒तयः॑ ॥

The Mantra without meters (Sanskrit)

व्यस्मे अधि शर्म तत्पक्षा वयो न यन्तन । विश्वानि विश्ववेदसो वरूथ्या मनामहेऽनेहसो व ऊतयः सुतयो व ऊतयः ॥

The Mantra's transliteration in English

vy asme adhi śarma tat pakṣā vayo na yantana | viśvāni viśvavedaso varūthyā manāmahe 'nehaso va ūtayaḥ suūtayo va ūtayaḥ ||

The Pada Paath (Sanskrit)

वि । अ॒स्मे इति॑ । अधि॑ । शर्म॑ । तत् । प॒क्षा । वयः॑ । न । य॒न्त॒न॒ । विश्वा॑नि । वि॒श्व॒ऽवे॒द॒सः॒ । व॒रू॒थ्या॑ । म॒ना॒म॒हे॒ । अ॒ने॒हसः॑ । वः॒ । ऊ॒तयः॑ । सु॒ऽऊ॒तयः॑ । वः॒ । ऊ॒तयः॑ ॥

The Pada Paath - transliteration

vi | asme iti | adhi | śarma | tat | pakṣā | vayaḥ | na | yantana | viśvāni | viśva-vedasaḥ | varūthyā | manāmahe | anehasaḥ | vaḥ | ūtayaḥ | su-ūtayaḥ | vaḥ | ūtayaḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-047/mantra-rig-08-047-004

MANTRA NUMBER:

Mantra 4 of Sukta 47 of Mandal 8 of Rig Veda
Mantra 4 of Varga 7 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 142 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- त्रित आप्त्यः

देवता (Devataa) :- आदित्याः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

यस्मा॒ अरा॑सत॒ क्षयं॑ जी॒वातुं॑ च॒ प्रचे॑तसः । मनो॒र्विश्व॑स्य॒ घेदि॒म आ॑दि॒त्या रा॒य ईशतेऽने॒हसो॑ व ऊ॒तयः॑ सु॒तयो॑ व ऊ॒तयः॑ ॥

The Mantra without meters (Sanskrit)

यस्मा अरासत क्षयं जीवातुं च प्रचेतसः । मनोर्विश्वस्य घेदिम आदित्या राय ईशतेऽनेहसो व ऊतयः सुतयो व ऊतयः ॥

The Mantra's transliteration in English

yasmā arāsata kṣayaṁ jīvātuṁ ca pracetasaḥ | manor viśvasya ghed ima ādityā rāya īśate 'nehaso va ūtayaḥ suūtayo va ūtayaḥ ||

The Pada Paath (Sanskrit)

यस्मै॑ । अरा॑सत । क्षय॑म् । जी॒वातु॑म् । च॒ । प्रऽचे॑तसः । मनोः॑ । विश्व॑स्य । घ॒ । इत् । इ॒मे । आ॒दि॒त्याः । रा॒यः । ई॒श॒ते । अ॒ने॒हसः॑ । व॒ः । ऊ॒तयः॑ । सु॒ऽऊ॒तयः॑ । व॒ः । ऊ॒तयः॑ ॥

The Pada Paath - transliteration

yasmai | arāsata | kṣayam | jīvātum | ca | pra-cetasaḥ | manoḥ | viśvasya | gha | it | ime | ādityāḥ | rāyaḥ | īśate | anehasaḥ | vaḥ | ūtayaḥ | su-ūtayaḥ | vaḥ | ūtayaḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-047/mantra-rig-08-047-005

MANTRA NUMBER:

Mantra 5 of Sukta 47 of Mandal 8 of Rig Veda
Mantra 5 of Varga 7 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 143 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- त्रित आप्त्यः

देवता (Devataa) :- आदित्याः

छन्द: (Chhand) :- भुरिक्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

परि॑ णो वृणजन्न॒घा दु॒र्गाणि॑ र॒थ्यो॑ यथा । स्यामेदिन्द्र॑स्य॒ शर्म॑ण्यादि॒त्याना॑मु॒ताव॑स्यने॒हसो॑ व ऊ॒तय॑: सु॒तयो॑ व ऊ॒तय॑: ॥

The Mantra without meters (Sanskrit)

परि णो वृणजन्नघा दुर्गाणि रथ्यो यथा । स्यामेदिन्द्रस्य शर्मण्यादित्यानामुतावस्यनेहसो व ऊतयः सुतयो व ऊतयः ॥

The Mantra's transliteration in English

pari ṇo vṛṇajann aghā durgāṇi rathyo yathā | syāmed indrasya śarmaṇy ādityānām utāvasy anehaso va ūtayaḥ suūtayo va ūtayaḥ ||

The Pada Paath (Sanskrit)

परि॑ । नः॒ । वृ॒ण॒ज॒न् । अ॒घा । दुः॒ऽगाणि॑ । र॒थ्यः॑ । य॒था॒ । स्याम॑ । इत् । इन्द्र॑स्य । शर्म॑णि । आ॒दि॒त्याना॑म् । उ॒त । अव॑सि । अ॒ने॒हसः॑ । वः॒ । ऊ॒तयः॑ । सु॒ऽऊ॒तयः॑ । वः॒ । ऊ॒तयः॑ ॥

The Pada Paath - transliteration

pari | naḥ | vṛṇajan | aghā | duḥ-gāṇi | rathyaḥ | yathā | syāma | it | indrasya | śarmaṇi | ādityānām | uta | avasi | anehasaḥ | vaḥ | ūtayaḥ | su-ūtayaḥ | vaḥ | ūtayaḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-047/mantra-rig-08-047-006

MANTRA NUMBER:

Mantra 6 of Sukta 47 of Mandal 8 of Rig Veda
Mantra 1 of Varga 8 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 144 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- त्रित आप्त्यः

देवता (Devataa) :- आदित्याः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

परिह्वृतेदना जनो युष्मादत्तस्य वायति । देवा अदभ्रमाश वो यमादित्या अहेतनानेहसो व ऊतयः सुतयो व ऊतयः ॥

The Mantra without meters (Sanskrit)

परिह्वृतेदना जनो युष्मादत्तस्य वायति । देवा अदभ्रमाश वो यमादित्या अहेतनानेहसो व ऊतयः सुतयो व ऊतयः ॥

The Mantra's transliteration in English

parihvṛted anā jano yuṣmādattasya vāyati | devā adabhram āśa vo yam ādityā ahetanānehaso va ūtayaḥ suūtayo va ūtayaḥ ||

The Pada Paath (Sanskrit)

परिऽह्वृता । इत् । अना । जनः । युष्माऽदत्तस्य । वायति । देवाः । अदभ्रम् । आश । वः । यम् । आदित्याः । अहेतन । अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥

The Pada Paath - transliteration

pari-hvṛtā | it | anā | janaḥ | yuṣmādattasya | vāyati | devāḥ | adabhram | āśa | vaḥ | yam | ādityāḥ | ahetana | anehasaḥ | vaḥ | ūtayaḥ | su-ūtayaḥ | vaḥ | ūtayaḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-047/mantra-rig-08-047-007

MANTRA NUMBER:

Mantra 7 of Sukta 47 of Mandal 8 of Rig Veda
Mantra 2 of Varga 8 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 145 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- त्रित आप्त्यः

देवता (Devataa) :- आदित्याः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

न तं ति॒ग्मं च॒न त्यजो॒ न द्रा॑सद॒भि तं गु॒रु । यस्मा॑ उ॒ शर्म॑ स॒प्रथ॒ आदि॑त्यासो॒ अरा॑ध्वमने॒हसो॑ व ऊ॒तय॑: सु॒तयो॑ व ऊ॒तय॑: ॥

The Mantra without meters (Sanskrit)

न तं तिग्मं चन त्यजो न द्रासदभि तं गुरु । यस्मा उ शर्म सप्रथ आदित्यासो अराध्वमनेहसो व ऊतयः सुतयो व ऊतयः ॥

The Mantra's transliteration in English

na taṁ tigmaṁ cana tyajo na drāsad abhi taṁ guru | yasmā u śarma sapratha ādityāso arādhvam anehaso va ūtayaḥ suūtayo va ūtayaḥ ||

The Pada Paath (Sanskrit)

न । तम् । ति॒ग्मम् । च॒न । त्यजः॑ । न । द्रा॒स॒त् । अ॒भि । तम् । गु॒रु । यस्मै॑ । ऊँ॒ इति॑ । शर्म॑ । स॒ऽप्रथः॑ । आदि॑त्यासः । अरा॑ध्वम् । अ॒ने॒हसः॑ । वः॒ । ऊ॒तयः॑ । सु॒ऽऊ॒तयः॑ । वः॒ । ऊ॒तयः॑ ॥

The Pada Paath - transliteration

na | tam | tigmam | cana | tyajaḥ | na | drāsat | abhi | tam | guru | yasmai | oṃ iti | śarma | sa-prathaḥ | ādityāsaḥ | arādhvam | anehasaḥ | vaḥ | ūtayaḥ | su-ūtayaḥ | vaḥ | ūtayaḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-047/mantra-rig-08-047-008

MANTRA NUMBER:

Mantra 8 of Sukta 47 of Mandal 8 of Rig Veda
Mantra 3 of Varga 8 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 146 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- त्रित आप्त्यः

देवता (Devataa) :- आदित्याः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

युष्मे देवा अपि ष्मसि युध्यन्त इव वर्मसु । यूयं महो न एनसो यूयमर्भादुरुष्यतानेहसो व ऊतयः सुतयो व ऊतयः ॥

The Mantra without meters (Sanskrit)

युष्मे देवा अपि ष्मसि युध्यन्त इव वर्मसु । यूयं महो न एनसो यूयमर्भादुरुष्यतानेहसो व ऊतयः सुतयो व ऊतयः ॥

The Mantra's transliteration in English

yuṣme devā api ṣmasi yudhyanta iva varmasu | yūyam maho na enaso yūyam arbhād uruṣyatānehaso va ūtayaḥ suūtayo va ūtayaḥ ||

The Pada Paath (Sanskrit)

युष्मे इति । देवाः । अपि । स्मसि । युध्यन्तःऽइव । वर्मसु । यूयम् । महः । नः । एनसः । यूयम् । अर्भात् । उरुष्यत । अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥

The Pada Paath - transliteration

yuṣme iti | devāḥ | api | smasi | yudhyantaḥ-iva | varmasu | yūyam | mahaḥ | naḥ | enasaḥ | yūyam | arbhāt | uruṣyata | anehasaḥ | vaḥ | ūtayaḥ | su-ūtayaḥ | vaḥ | ūtayaḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-047/mantra-rig-08-047-009

MANTRA NUMBER:

Mantra 9 of Sukta 47 of Mandal 8 of Rig Veda
Mantra 4 of Varga 8 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 147 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- त्रित आप्त्यः

देवता (Devataa) :- आदित्याः

छन्द: (Chhand) :- भुरिक्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अदि॑तिर्न उरुष्य॒त्वदि॑तिः॒ शर्म॑ यच्छतु । मा॒ता मि॒त्रस्य॑ रे॒वतो॑ऽर्य॒म्णो वरु॑णस्य चाने॒हसो॑ व ऊ॒तय॑ः सु॒तयो॑ व ऊ॒तय॑ः ॥

The Mantra without meters (Sanskrit)

अदितिर्न उरुष्यत्वदितिः शर्म यच्छतु । माता मित्रस्य रेवतोऽर्यम्णो वरुणस्य चानेहसो व ऊतयः सुतयो व ऊतयः ॥

The Mantra's transliteration in English

aditir na uruṣyatv aditiḥ śarma yacchatu | mātā mitrasya revato 'ryamṇo varuṇasya cānehaso va ūtayaḥ suūtayo va ūtayaḥ ||

The Pada Paath (Sanskrit)

अदि॑तिः । नः॒ । उ॒रु॒ष्य॒तु॒ । अदि॑तिः । शर्म॑ । य॒च्छ॒तु॒ । मा॒ता । मि॒त्रस्य॑ । रे॒वतः॑ । अ॒र्य॒म्णः । वरु॑णस्य । च॒ । अ॒ने॒हसः॑ । वः॒ । ऊ॒तयः॑ । सु॒ऽऊ॒तयः॑ । वः॒ । ऊ॒तयः॑ ॥

The Pada Paath - transliteration

aditiḥ | naḥ | uruṣyatu | aditiḥ | śarma | yacchatu | mātā | mitrasya | revataḥ | ayarmṇaḥ | varuṇasya | ca | anehasaḥ | vaḥ | ūtayaḥ | su-ūtayaḥ | vaḥ | ūtayaḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-047/mantra-rig-08-047-010

MANTRA NUMBER:
Mantra 10 of Sukta 47 of Mandal 8 of Rig Veda
Mantra 5 of Varga 8 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 148 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:
ऋषिः (Rishi) :- त्रित आप्त्यः

देवता (Devataa) :- आदित्याः

छन्दः (Chhand) :- स्वराट्त्रिष्टुप्

स्वरः (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

यद्दे॒वाः शर्म॑ शर॒णं यद्भ॒द्रं यद॑नातु॒रम् । त्रि॒धातु॒ यद्व॑रू॒थ्यं१॒॑ तद॒स्मासु॒ वि य॑न्तनाने॒हसो॑ व ऊ॒तय॑: सु॒तयो॑ व ऊ॒तय॑: ॥

The Mantra without meters (Sanskrit)

यद्देवाः शर्म शरणं यद्भद्रं यदनातुरम् । त्रिधातु यद्वरूथ्यं तदस्मासु वि यन्तनानेहसो व ऊतयः सुतयो व ऊतयः ॥

The Mantra's transliteration in English

yad devāḥ śarma śaraṇaṁ yad bhadraṁ yad anāturam | tridhātu yad varūthyaṁ tad asmāsu vi yantanānehaso va ūtayaḥ suūtayo va ūtayaḥ ||

The Pada Paath (Sanskrit)

यत् । दे॒वाः॒ । शर्म॑ । श॒र॒णम् । यत् । भ॒द्रम् । यत् । अ॒ना॒तु॒रम् । त्रि॒ऽधातु॑ । यत् । व॒रू॒थ्य॑म् । तत् । अ॒स्मासु॑ । वि । य॒न्त॒न॒ । अ॒ने॒हसः॑ । वः॒ । ऊ॒तयः॑ । सु॒ऽऊ॒तयः॑ । वः॒ । ऊ॒तयः॑ ॥

The Pada Paath - transliteration

yat | devāḥ | śarma | śaraṇam | yat | bhadram | yat | anāturam | tri-dhātu | yat | varūthyam | tat | asmāsu | vi | yantana | anehasaḥ | vaḥ | ūtayaḥ | su-ūtayaḥ | vaḥ | ūtayaḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-047/mantra-rig-08-047-011

MANTRA NUMBER:

Mantra 11 of Sukta 47 of Mandal 8 of Rig Veda
Mantra 1 of Varga 9 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 149 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- त्रित आप्त्यः

देवता (Devataa) :- आदित्याः

छन्दः (Chhand) :- स्वराट्त्रिष्टुप्

स्वरः (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

आदि॑त्या॒ अव॒ हि ख्यताधि॒ कूला॑दिव॒ स्पश॑: । सु॒ती॒र्थमर्व॑तो य॒थानु॑ नो नेषथा सु॒गम॑ने॒हसो॑ व ऊ॒तय॑: सु॒तयो॑ व ऊ॒तय॑: ॥

The Mantra without meters (Sanskrit)

आदित्या अव हि ख्यताधि कूलादिव स्पशः । सुतीर्थमर्वतो यथानु नो नेषथा सुगमनेहसो व ऊतयः सुतयो व ऊतयः ॥

The Mantra's transliteration in English

ādityā ava hi khyatādhi kūlād iva spaśaḥ | sutīrtham arvato yathānu no neṣathā sugam anehaso va ūtayaḥ suūtayo va ūtayaḥ ||

The Pada Paath (Sanskrit)

आदि॑त्याः । अव॑ । हि । ख्यत॑ । अधि॑ । कूला॑त्ऽइव । स्पशः॑ । सु॒ऽती॒र्थम् । अर्व॑तः । य॒था॒ । अनु॑ । नः॒ । ने॒ष॒थ॒ । सु॒ऽगम् । अ॒ने॒हसः॑ । वः॒ । ऊ॒तयः॑ । सु॒ऽऊ॒तयः॑ । वः॒ । ऊ॒तयः॑ ॥

The Pada Paath - transliteration

ādityāḥ | ava | hi | khyata | adhi | kūlāt-iva | spaśaḥ | su-tīrtham | arvataḥ | yathā | anu | naḥ | neṣatha | su-gam | anehasaḥ | vaḥ | ūtayaḥ | su-ūtayaḥ | vaḥ | ūtayaḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-047/mantra-rig-08-047-012

MANTRA NUMBER:

Mantra 12 of Sukta 47 of Mandal 8 of Rig Veda
Mantra 2 of Varga 9 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 150 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- त्रित आप्त्यः

देवता (Devataa) :- आदित्याः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

नेह भ॒द्रं र॑क्ष॒स्विने॒ नाव॒यै नोप॒या उ॒त । गवे॑ च भ॒द्रं धे॒नवे॑ वी॒राय॑ च श्रवस्य॒ते॑ऽने॒हसो॑ व ऊ॒तय॑ः सु॒तयो॑ व ऊ॒तय॑ः ॥

The Mantra without meters (Sanskrit)

नेह भद्रं रक्षस्विने नावयै नोपया उत । गवे च भद्रं धेनवे वीराय च श्रवस्यतेऽनेहसो व ऊतयः सुतयो व ऊतयः ॥

The Mantra's transliteration in English

neha bhadraṁ rakṣasvine nāvayai nopayā uta | gave ca bhadraṁ dhenave vīrāya ca śravasyate 'nehaso va ūtayaḥ suūtayo va ūtayaḥ ||

The Pada Paath (Sanskrit)

न । इ॒ह । भ॒द्रम् । र॒क्ष॒स्विने॑ । न । अ॒व॒ऽयै । न । उ॒प॒ऽयै । उ॒त । गवे॑ । च॒ । भ॒द्रम् । धे॒नवे॑ । वी॒राय॑ । च॒ । श्र॒व॒स्य॒ते । अ॒ने॒हस॑ः । व॒ः । ऊ॒तय॑ः । सु॒ऽऊ॒तय॑ः । व॒ः । ऊ॒तय॑ः ॥

The Pada Paath - transliteration

na | iha | bhadram | rakṣasvine | na | ava-yai | na | upa-yai | uta | gave | ca | bhadram | dhenave | vīrāya | ca | śravasyate | anehasaḥ | vaḥ | ūtayaḥ | su-ūtayaḥ | vaḥ | ūtayaḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-047/mantra-rig-08-047-013

MANTRA NUMBER:

Mantra 13 of Sukta 47 of Mandal 8 of Rig Veda
Mantra 3 of Varga 9 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 151 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- त्रित आप्त्यः

देवता (Devataa) :- आदित्याः

छन्द: (Chhand) :- भुरिक्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

यदा॒विर्यद॑पी॒च्यं१॒॑ दे॒वा॑सो॒ अस्ति॑ दु॒ष्कृ॒तम् । त्रि॒ते तद्वि॒श्व॑मा॒प्त्य आ॒रे अ॒स्मद्द॑धातना॒नेहसो॑ व ऊ॒तय॑: सु॒तयो॑ व ऊ॒तय॑: ॥

The Mantra without meters (Sanskrit)

यदाविर्यदपीच्यं देवासो अस्ति दुष्कृतम् । त्रिते तद्विश्वमाप्त्य आरे अस्मद्दधातनानेहसो व ऊतयः सुतयो व ऊतयः ॥

The Mantra's transliteration in English

yad āvir yad apīcyaṁ devāso asti duṣkṛtam | trite tad viśvam āptya āre asmad dadhātanānehaso va ūtayaḥ suūtayo va ūtayaḥ ||

The Pada Paath (Sanskrit)

यत् । आ॒विः । यत् । अ॒पी॒च्य॑म् । दे॒वा॑सः । अस्ति॑ । दुः॒ऽकृ॒तम् । त्रि॒ते । तत् । विश्व॑म् । आ॒प्त्ये । आ॒रे । अ॒स्मत् । द॒धा॒त॒न॒ । अ॒ने॒हसः॑ । वः॒ । ऊ॒तयः॑ । सु॒ऽऊ॒तयः॑ । वः॒ । ऊ॒तयः॑ ॥

The Pada Paath - transliteration

yat | āviḥ | yat | apīcyam | devāsaḥ | asti | duḥ-kṛtam | trite | tat | viśvam | āptye | āre | asmat | dadhātana | anehasaḥ | vaḥ | ūtayaḥ | su-ūtayaḥ | vaḥ | ūtayaḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-047/mantra-rig-08-047-014

MANTRA NUMBER:

Mantra 14 of Sukta 47 of Mandal 8 of Rig Veda
Mantra 4 of Varga 9 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 152 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- त्रित आप्त्यः

देवता (Devataa) :- आदित्या उषाश्च

छन्दः (Chhand) :- त्रिष्टुप्

स्वरः (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

यच्च॒ गोषु॑ दु॒ष्ष्वप्न्यं॒ यच्चा॒स्मे दु॑हितर्दिवः । त्रि॒ताय॒ तद्वि॑भावर्या॒प्त्याय॒ परा॑ वहा॒नेहसौ॑ व ऊ॒तयः॑ सु॒तयौ॑ व ऊ॒तयः॑ ॥

The Mantra without meters (Sanskrit)

यच्च गोषु दुष्ष्वप्न्यं यच्चास्मे दुहितर्दिवः । त्रिताय तद्विभावर्याप्त्याय परा वहानेहसो व ऊतयः सुतयो व ऊतयः ॥

The Mantra's transliteration in English

yac ca goṣu duṣṣvapnyaṁ yac cāsme duhitar divaḥ | tritāya tad vibhāvary āptyāya parā vahānehaso va ūtayaḥ suūtayo va ūtayaḥ ||

The Pada Paath (Sanskrit)

यत् । च॒ । गोषु॑ । दुः॒ऽस्वप्न्य॑म् । यत् । च॒ । अ॒स्मे इति॑ । दु॒हि॒तः॒ । दि॒वः॒ । त्रि॒ताय॑ । तत् । वि॒भा॒ऽव॒रि॒ । आ॒प्त्याय॑ । परा॑ । व॒ह॒ । अ॒ने॒हसः॑ । वः॒ । ऊ॒तयः॑ । सु॒ऽऊ॒तयः॑ । वः॒ । ऊ॒तयः॑ ॥

The Pada Paath - transliteration

yat | ca | goṣu | duḥ-svapnyam | yat | ca | asme iti | duhitaḥ | divaḥ | tritāya | tat | vibhāvari | āptyāya | parā | vaha | anehasaḥ | vaḥ | ūtayaḥ | su-ūtayaḥ | vaḥ | ūtayaḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-047/mantra-rig-08-047-015

MANTRA NUMBER:

Mantra 15 of Sukta 47 of Mandal 8 of Rig Veda
Mantra 5 of Varga 9 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 153 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- त्रित आप्त्यः

देवता (Devataa) :- आदित्या उषाश्च

छन्द: (Chhand) :- भुरिक्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

निष्कं वा घा कृणवते स्रजं वा दुहितर्दिवः । त्रिते दुष्ष्वप्न्यं सर्वमाप्त्ये परि दद्मस्यनेहसो व ऊतयः सुतयो व ऊतयः ॥

The Mantra without meters (Sanskrit)

निष्कं वा घा कृणवते स्रजं वा दुहितर्दिवः । त्रिते दुष्ष्वप्न्यं सर्वमाप्त्ये परि दद्मस्यनेहसो व ऊतयः सुतयो व ऊतयः ॥

The Mantra's transliteration in English

niṣkaṁ vā ghā kṛṇavate srajaṁ vā duhitar divaḥ | trite duṣṣvapnyaṁ sarvam āptye pari dadmasy anehaso va ūtayaḥ suūtayo va ūtayaḥ ||

The Pada Paath (Sanskrit)

निष्कम् । वा । घ । कृणवते । स्रजम् । वा । दुहितः । दिवः । त्रिते । दुःऽस्वप्न्यम् । सर्वम् । आप्त्ये । परि । दद्मसि । अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥

The Pada Paath - transliteration

niṣkam | vā | gha | kṛṇavate | srajam | vā | duhitaḥ | divaḥ | trite | duḥ-svapnyam | sarvam | āptye | pari | dadmasi | anehasaḥ | vaḥ | ūtayaḥ | su-ūtayaḥ | vaḥ | ūtayaḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-047/mantra-rig-08-047-016

MANTRA NUMBER:

Mantra 16 of Sukta 47 of Mandal 8 of Rig Veda
Mantra 1 of Varga 10 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 154 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- त्रित आप्त्यः

देवता (Devataa) :- आदित्या उषाश्च

छन्द: (Chhand) :- भुरिक्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

तदन्नाय तदपसे तं भागमुपसेदुषे । त्रिताय च द्विताय चोषो दुष्ष्वप्न्यं वहानेहसो व ऊतयः सुतयो व ऊतयः ॥

The Mantra without meters (Sanskrit)

तदन्नाय तदपसे तं भागमुपसेदुषे । त्रिताय च द्विताय चोषो दुष्ष्वप्न्यं वहानेहसो व ऊतयः सुतयो व ऊतयः ॥

The Mantra's transliteration in English

tadannāya tadapase tam bhāgam upaseduṣe | tritāya ca dvitāya coṣo duṣṣvapnyaṁ vahānehaso va ūtayaḥ suūtayo va ūtayaḥ ||

The Pada Paath (Sanskrit)

तत्ऽअन्नाय । तत्ऽअपसे । तम् । भागम् । उपऽसेदुषे । त्रिताय । च । द्विताय । च । उषः । दुःऽस्वप्न्यम् । वह । अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥

The Pada Paath - transliteration

tat-annāya | tat-apase | tam | bhāgam | upa-seduṣe | tritāya | ca | dvitāya | ca | uṣaḥ | duḥ-svapnyam | vaha | anehasaḥ | vaḥ | ūtayaḥ | su-ūtayaḥ | vaḥ | ūtayaḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-047/mantra-rig-08-047-017

MANTRA NUMBER:

Mantra 17 of Sukta 47 of Mandal 8 of Rig Veda
Mantra 2 of Varga 10 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 155 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- त्रित आप्त्यः

देवता (Devataa) :- आदित्या उषाश्च

छन्दः (Chhand) :- स्वराट्त्रिष्टुप्

स्वरः (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

यथा॑ क॒लां यथा॑ श॒फं यथ॑ ऋ॒णं सं॒नया॑मसि । ए॒वा दु॒ष्ष्वप्न्यं॒ सर्व॑मा॒प्त्ये सं न॑यामस्यने॒हसो॑ व ऊ॒तयः॑ सु॒तयो॑ व ऊ॒तयः॑ ॥

The Mantra without meters (Sanskrit)

यथा कलां यथा शफं यथ ऋणं संनयामसि । एवा दुष्ष्वप्न्यं सर्वमाप्त्ये सं नयामस्यनेहसो व ऊतयः सुतयो व ऊतयः ॥

The Mantra's transliteration in English

yathā kalāṁ yathā śaphaṁ yatha ṛṇaṁ saṁnayāmasi | evā duṣṣvapnyaṁ sarvam āptye saṁ nayāmasy anehaso va ūtayaḥ suūtayo va ūtayaḥ ||

The Pada Paath (Sanskrit)

यथा॑ । क॒लाम् । यथा॑ । श॒फम् । यथा॑ । ऋ॒णम् । स॒म्ऽनया॑मसि । ए॒व । दुः॒ऽस्वप्न्य॑म् । सर्व॑म् । आ॒प्त्ये । सम् । न॒या॒म॒सि॒ । अ॒ने॒हसः॑ । वः॒ । ऊ॒तयः॑ । सु॒ऽऊ॒तयः॑ । वः॒ । ऊ॒तयः॑ ॥

The Pada Paath - transliteration

yathā | kalām | yathā | śapham | yathā | ṛṇam | sam-nayāmasi | eva | duḥ-svapnyam | sarvam | āptye | sam | nayāmasi | anehasaḥ | vaḥ | ūtayaḥ | su-ūtayaḥ | vaḥ | ūtayaḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-047/mantra-rig-08-047-018

MANTRA NUMBER:

Mantra 18 of Sukta 47 of Mandal 8 of Rig Veda
Mantra 3 of Varga 10 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 156 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- त्रित आप्त्यः

देवता (Devataa) :- आदित्या उषाश्च

छन्द: (Chhand) :- भुरिक्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अजैष्माद्यासनाम चाभूमानागसो वयम् । उषो यस्माद्दुष्ष्वप्न्यादभैष्माप तदुच्छत्वनेहसो व ऊतयः सुतयो व ऊतयः ॥

The Mantra without meters (Sanskrit)

अजैष्माद्यासनाम चाभूमानागसो वयम् । उषो यस्माद्दुष्ष्वप्न्यादभैष्माप तदुच्छत्वनेहसो व ऊतयः सुतयो व ऊतयः ॥

The Mantra's transliteration in English

ajaiṣmādyāsanāma cābhūmānāgaso vayam | uṣo yasmād duṣṣvapnyād abhaiṣmāpa tad ucchatv anehaso va ūtayaḥ suūtayo va ūtayaḥ ||

The Pada Paath (Sanskrit)

अजैष्म । अद्य । असनाम । च । अभूम । अनागसः । वयम् । उषः । यस्मात् । दुःऽस्वप्न्यात् । अभैष्म । अप । तत् । उच्छतु । अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥

The Pada Paath - transliteration

ajaiṣma | adya | asanāma | ca | abhūma | anāgasaḥ | vayam | uṣaḥ | yasmāt | duḥ-svapnyāt | abhaiṣma | apa | tat | ucchatu | anehasaḥ | vaḥ | ūtayaḥ | su-ūtayaḥ | vaḥ | ūtayaḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-048/mantra-rig-08-048-001

MANTRA NUMBER:

Mantra 1 of Sukta 48 of Mandal 8 of Rig Veda
Mantra 1 of Varga 11 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 157 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रगाथः काण्वः

देवता (Devataa) :- सोमः

छन्द: (Chhand) :- पादनिचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

स्वा॒दोर॑भक्षि॒ वय॑सः सुमे॒धाः स्वा॒ध्यो॑ वरिवो॒वित्त॑रस्य । विश्वे॒ यं दे॒वा उ॒त मर्त्या॑सो॒ मधु॑ ब्रु॒वन्तो॑ अ॒भि सं॒चर॑न्ति ॥

The Mantra without meters (Sanskrit)

स्वादोरभक्षि वयसः सुमेधाः स्वाध्यो वरिवोवित्तरस्य । विश्वे यं देवा उत मर्त्यासो मधु ब्रुवन्तो अभि संचरन्ति ॥

The Mantra's transliteration in English

svādor abhakṣi vayasaḥ sumedhāḥ svādhyo varivovittarasya | viśve yaṁ devā uta martyāso madhu bruvanto abhi saṁcaranti ||

The Pada Paath (Sanskrit)

स्वा॒दोः । अ॒भ॒क्षि॒ । वय॑सः । सु॒ऽमे॒धाः । सु॒ऽआ॒ध्यः॑ । व॒रि॒वो॒वित्ऽत॑रस्य । विश्वे॑ । यम् । दे॒वाः । उ॒त । मर्त्या॑सः । मधु॑ । ब्रु॒वन्तः॑ । अ॒भि । स॒म्ऽचर॑न्ति ॥

The Pada Paath - transliteration

svādoḥ | abhakṣi | vayasaḥ | su-medhāḥ | su-ādhyaḥ | varivovit-tarasya | viśve | yam | devāḥ | uta | martyāsaḥ | madhu | bruvantaḥ | abhi | sam-caranti

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-048/mantra-rig-08-048-002

MANTRA NUMBER:
Mantra 2 of Sukta 48 of Mandal 8 of Rig Veda
Mantra 2 of Varga 11 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 158 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:
ऋषि: (Rishi) :- प्रगाथः काण्वः

देवता (Devataa) :- सोमः

छन्द: (Chhand) :- पादनिचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒न्तश्च॒ प्रागा॒ अदि॑तिर्भवास्यवया॒ता हर॑सो॒ दैव्य॑स्य । इन्द॒विन्द्र॑स्य स॒ख्यं जु॑षा॒णः श्रौष्टी॑व॒ धुर॒मनु॑ रा॒य ऋ॑ध्याः ॥

The Mantra without meters (Sanskrit)
अन्तश्च प्रागा अदितिर्भवास्यवयाता हरसो दैव्यस्य । इन्दविन्द्रस्य सख्यं जुषाणः श्रौष्टीव धुरमनु राय ऋध्याः ॥

The Mantra's transliteration in English
antaś ca prāgā aditir bhavāsy avayātā haraso daivyasya | indav indrasya sakhyaṁ juṣāṇaḥ śrauṣṭīva dhuram anu rāya ṛdhyāḥ ||

The Pada Paath (Sanskrit)
अ॒न्तरिति॑ । च॒ । प्र । अगाः॑ । अदि॑तिः । भ॒वा॒सि॒ । अ॒व॒ऽया॒ता । हर॑सः । दैव्य॑स्य । इन्दो॒ इति॑ । इन्द्र॑स्य । स॒ख्यम् । जु॒षा॒णः । श्रौष्टी॑ऽइव । धुर॑म् । अनु॑ । रा॒ये । ऋ॒ध्याः॒ ॥

The Pada Paath - transliteration
antariti | ca | pra | agāḥ | aditiḥ | bhavāsi | ava-yātā | harasaḥ | daivyasya | indo iti | indrasya | sakhyam | juṣāṇaḥ | śrauṣṭī-iva | dhuram | anu | rāye | ṛdhyāḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-048/mantra-rig-08-048-003

MANTRA NUMBER:

Mantra 3 of Sukta 48 of Mandal 8 of Rig Veda
Mantra 3 of Varga 11 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 159 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रगाथः काण्वः

देवता (Devataa) :- सोमः

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अपा॑म॒ सोम॑म॒मृता॑ अभू॒माग॑न्म॒ ज्योति॒रवि॑दाम दे॒वान् । किं नू॒नम॒स्मान्कृ॑णव॒दरा॑ति॒: किमु॑ धू॒र्तिर॑मृत॒ मर्त्य॑स्य ॥

The Mantra without meters (Sanskrit)

अपाम सोमममृता अभूमागन्म ज्योतिरविदाम देवान् । किं नूनमस्मान्कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य ॥

The Mantra's transliteration in English

apāma somam amṛtā abhūmāganma jyotir avidāma devān | kiṁ nūnam asmān kṛṇavad arātiḥ kim u dhūrtir amṛta martyasya ||

The Pada Paath (Sanskrit)

अपा॑म । सोम॑म् । अ॒मृताः॑ । अ॒भू॒म॒ । अग॑न्म । ज्योतिः॑ । अवि॑दाम । दे॒वान् । किम् । नू॒नम् । अ॒स्मान् । कृ॒ण॒व॒त् । अरा॑ति । किम् । ऊँ इति॑ । धू॒र्तिः॑ । अ॒मृ॒त॒ । मर्त्य॑स्य ॥

The Pada Paath - transliteration

apāma | somam | amṛtāḥ | abhūma | aganma | jyotiḥ | avidāma | devān | kim | nūnam | asmān | kṛṇavat | arāti | kim | oṃ iti | dhūrtiḥ | amṛta | martyasya

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-048/mantra-rig-08-048-004

MANTRA NUMBER:

Mantra 4 of Sukta 48 of Mandal 8 of Rig Veda
Mantra 4 of Varga 11 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 160 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रगाथः काण्वः

देवता (Devataa) :- सोमः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

शं नो॑ भव हृ॒द आ पी॒त इ॑न्दो पि॒तेव॑ सोम सू॒नवे॑ सु॒शेवः॑ । सखे॑व॒ सख्य॑ उरुशंस॒ धीरः॒ प्र ण॒ आयु॑र्जी॒वसे॑ सोम तारीः ॥

The Mantra without meters (Sanskrit)

शं नो भव हृद आ पीत इन्दो पितेव सोम सूनवे सुशेवः । सखेव सख्य उरुशंस धीरः प्र ण आयुर्जीवसे सोम तारीः ॥

The Mantra's transliteration in English

śaṁ no bhava hṛda ā pīta indo piteva soma sūnave suśevaḥ | sakheva sakhya uruśaṁsa dhīraḥ pra ṇa āyur jīvase soma tārīḥ ||

The Pada Paath (Sanskrit)

शम् । नः॒ । भ॒व॒ । हृ॒दे । आ । पी॒तः । इ॒न्दो॒ इति॑ । पि॒ताऽइ॑व । सो॒म॒ । सू॒नवे॑ । सु॒ऽशेवः॑ । सखा॑ऽइ॑व । सख्ये॑ । उ॒रु॒ऽशं॒स॒ । धीरः॑ । प्र । नः॒ । आयुः॑ । जी॒वसे॑ । सो॒म॒ । ता॒रीः॒ ॥

The Pada Paath - transliteration

śam | naḥ | bhava | hṛde | ā | pītaḥ | indo iti | pitāiva | soma | sūnave | su-śevaḥ | sakhāiva | sakhye | uru-śaṃsa | dhīraḥ | pra | naḥ | āyuḥ | jīvase | soma | tārīḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-048/mantra-rig-08-048-005

MANTRA NUMBER:

Mantra 5 of Sukta 48 of Mandal 8 of Rig Veda
Mantra 5 of Varga 11 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 161 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रगाथः काण्वः

देवता (Devataa) :- सोमः

छन्द: (Chhand) :- विराट्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

इ॒मे मा॑ पी॒ता य॒शस॑ उरु॒ष्यवो॑ रथं॒ न गाव॒: सम॑नाह॒ पर्व॑सु । ते मा॑ रक्षन्तु वि॒स्रस॑श्च॒रित्रा॑दु॒त मा॒ स्रामा॑द्यवयन्त्वि॒न्द॑वः ॥

The Mantra without meters (Sanskrit)

इमे मा पीता यशस उरुष्यवो रथं न गावः समनाह पर्वसु । ते मा रक्षन्तु विस्रसश्चरित्रादुत मा स्रामाद्यवयन्त्विन्दवः ॥

The Mantra's transliteration in English

ime mā pītā yaśasa uruṣyavo rathaṁ na gāvaḥ sam anāha parvasu | te mā rakṣantu visrasaś caritrād uta mā srāmād yavayantv indavaḥ ||

The Pada Paath (Sanskrit)

इ॒मे । मा॒ । पी॒ताः । य॒शसः॑ । उ॒रु॒ष्यवः॑ । रथ॑म् । न । गावः॑ । सम् । अ॒ना॒ह॒ । पर्व॑ऽसु । ते । मा॒ । र॒क्ष॒न्तु॒ । वि॒स्रसः॑ । च॒रित्रा॑त् । उ॒त । मा॒ । स्रामा॑त् । य॒व॒य॒न्तु॒ । इन्द॑वः ॥

The Pada Paath - transliteration

ime | mā | pītāḥ | yaśasaḥ | uruṣyavaḥ | ratham | na | gāvaḥ | sam | anāha | parva-su | te | mā | rakṣantu | visrasaḥ | caritrāt | uta | mā | srāmāt | yavayantu | indavaḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-048/mantra-rig-08-048-006

MANTRA NUMBER:

Mantra 6 of Sukta 48 of Mandal 8 of Rig Veda
Mantra 1 of Varga 12 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 162 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रगाथः काण्वः

देवता (Devataa) :- सोमः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒ग्निं न मा॑ मथि॒तं सं दि॑दीपः॒ प्र च॑क्षय कृणु॒हि वस्य॑सो नः । अथा॒ हि ते॒ मद॒ आ सो॑म॒ मन्ये॑ रे॒वाँ इ॑व॒ प्र च॑रा पु॒ष्टिमच्छ॑ ॥

The Mantra without meters (Sanskrit)

अग्निं न मा मथितं सं दिदीपः प्र चक्षय कृणुहि वस्यसो नः । अथा हि ते मद आ सोम मन्ये रेवाँ इव प्र चरा पुष्टिमच्छ ॥

The Mantra's transliteration in English

agniṁ na mā mathitaṁ saṁ didīpaḥ pra cakṣaya kṛṇuhi vasyaso naḥ | athā hi te mada ā soma manye revām̐ iva pra carā puṣṭim accha ||

The Pada Paath (Sanskrit)

अ॒ग्निम् । न । मा॒ । म॒थि॒तम् । सम् । दि॒दी॒पः॒ । प्र । च॒क्ष॒य॒ । कृ॒णु॒हि । वस्य॑सः । नः॒ । अथ॑ । हि । ते॒ । मदे॑ । आ । सो॒म॒ । मन्ये॑ । रे॒वान्ऽइ॑व । प्र । च॒र॒ । पु॒ष्टिम् । अच्छ॑ ॥

The Pada Paath - transliteration

agnim | na | mā | mathitam | sam | didīpaḥ | pra | cakṣaya | kṛṇuhi | vasyasaḥ | naḥ | atha | hi | te | made | ā | soma | manye | revān-iva | pra | cara | puṣṭim | accha

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-048/mantra-rig-08-048-007

MANTRA NUMBER:

Mantra 7 of Sukta 48 of Mandal 8 of Rig Veda
Mantra 2 of Varga 12 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 163 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रगाथः काण्वः

देवता (Devataa) :- सोमः

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

इ॒षि॒रेण॑ ते॒ मन॑सा सु॒तस्य॑ भक्षी॒महि॒ पित्र्य॑स्येव रा॒यः । सोम॑ राज॒न्प्र ण॒ आयूं॑षि तारी॒रहा॑नीव॒ सूर्यो॑ वास॒राणि॑ ॥

The Mantra without meters (Sanskrit)

इषिरेण ते मनसा सुतस्य भक्षीमहि पित्र्यस्येव रायः । सोम राजन्प्र ण आयूंषि तारीरहानीव सूर्यो वासराणि ॥

The Mantra's transliteration in English

iṣireṇa te manasā sutasya bhakṣīmahi pitryasyeva rāyaḥ | soma rājan pra ṇa āyūṁṣi tārīr ahānīva sūryo vāsarāṇi ||

The Pada Paath (Sanskrit)

इ॒षि॒रेण॑ । ते॒ । मन॑सा । सु॒तस्य॑ । भ॒क्षी॒महि॑ । पित्र्य॑स्यऽइव । रा॒यः । सोम॑ । राज॑न् । प्र । नः॒ । आयूं॑षि । ता॒रीः॒ । अहा॑निऽइव । सूर्यः॑ । वा॒स॒राणि॑ ॥

The Pada Paath - transliteration

iṣireṇa | te | manasā | sutasya | bhakṣīmahi | pitryasya-iva | rāyaḥ | soma | rājan | pra | naḥ | āyūṃṣi | tārīḥ | ahāni-iva | sūryaḥ | vāsarāṇi

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-048/mantra-rig-08-048-008

MANTRA NUMBER:

Mantra 8 of Sukta 48 of Mandal 8 of Rig Veda
Mantra 3 of Varga 12 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 164 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रगाथः काण्वः

देवता (Devataa) :- सोमः

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

सोम॑ राजन्मृ॒ळया॑ नः स्व॒स्ति तव॑ स्मसि व्र॒त्या॒३॑॑स्तस्य॑ विद्धि । अल॑र्ति॒ दक्ष॑ उ॒त म॒न्युरि॑न्दो॒ मा नो॑ अ॒र्यो अ॑नु॒का॒मं परा॑ दाः ॥

The Mantra without meters (Sanskrit)

सोम राजन्मृळया नः स्वस्ति तव स्मसि व्रत्यास्तस्य विद्धि । अलर्ति दक्ष उत मन्युरिन्दो मा नो अर्यो अनुकामं परा दाः ॥

The Mantra's transliteration in English

soma rājan mṛḻayā naḥ svasti tava smasi vratyās tasya viddhi | alarti dakṣa uta manyur indo mā no aryo anukāmam parā dāḥ ||

The Pada Paath (Sanskrit)

सोम॑ । रा॒ज॒न् । मृ॒ळय॑ । नः॒ । स्व॒स्ति । तव॑ । स्म॒सि॒ । व्र॒त्याः॑ । तस्य॑ । वि॒द्धि॒ । अल॑र्ति । दक्षः॑ । उ॒त । म॒न्युः॒ । इ॒न्दो॒ इति॑ । मा । नः॒ । अ॒र्यः । अ॒नु॒ऽका॒मम् । परा॑ । दाः॒ ॥

The Pada Paath - transliteration

soma | rājan | mṛḻaya | naḥ | svasti | tava | smasi | vratyāḥ | tasya | viddhi | alarti | dakṣaḥ | uta | manyuḥ | indo iti | mā | naḥ | aryaḥ | anu-kāmam | parā | dāḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-048/mantra-rig-08-048-009

MANTRA NUMBER:

Mantra 9 of Sukta 48 of Mandal 8 of Rig Veda
Mantra 4 of Varga 12 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 165 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रगाथः काण्वः

देवता (Devataa) :- सोमः

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

त्वं हि न॑स्त॒न्व॑: सोम गो॒पा गात्रे॑गात्रे निष॒सत्था॑ नृ॒चक्षा॑: । यत्ते॑ व॒यं प्र॑मि॒नाम॑ व्र॒तानि॒ स नो॑ मृळ सुष॒खा दे॑व॒ वस्य॑: ॥

The Mantra without meters (Sanskrit)

त्वं हि नस्तन्वः सोम गोपा गात्रेगात्रे निषसत्था नृचक्षाः । यत्ते वयं प्रमिनाम व्रतानि स नो मृळ सुषखा देव वस्यः ॥

The Mantra's transliteration in English

tvaṁ hi nas tanvaḥ soma gopā gātre-gātre niṣasatthā nṛcakṣāḥ | yat te vayam praminām vratāni sa no mṛḻa suṣakhā deva vasyaḥ ||

The Pada Paath (Sanskrit)

त्वम् । हि । नः॒ । त॒न्वः॑ । सो॒म॒ । गो॒पाः । गात्रे॑ऽगात्रे । नि॒ऽस॒सत्थ॑ । नृ॒ऽचक्षाः॑ । यत् । ते॒ । व॒यम् । प्र॒ऽमि॒नाम॑ । व्र॒तानि॑ । सः । नः॒ । मृ॒ळ॒ । सु॒ऽस॒खा । दे॒व॒ । वस्यः॑ ॥

The Pada Paath - transliteration

tvam | hi | naḥ | tanvaḥ | soma | gopāḥ | gātre--gātre | ni-sasattha | nṛ-cakṣāḥ | yat | te | vayam | pra-mināma | vratāni | saḥ | naḥ | mṛḻa | su-sakhā | deva | vasyaḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-048/mantra-rig-08-048-010

MANTRA NUMBER:

Mantra 10 of Sukta 48 of Mandal 8 of Rig Veda
Mantra 5 of Varga 12 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 166 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रगाथः काण्वः

देवता (Devataa) :- सोमः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

ऋ॒दू॒दरे॑ण॒ सख्या॑ सचेय॒ यो मा॒ न रिष्ये॑द्धर्यश्व पी॒तः । अ॒यं यः सोमो॒ न्यधा॑य्य॒स्मे तस्मा॒ इन्द्रं॑ प्र॒तिर॑मे॒म्यायुः॑ ॥

The Mantra without meters (Sanskrit)

ऋदूदरेण सख्या सचेय यो मा न रिष्येद्धर्यश्व पीतः । अयं यः सोमो न्यधाय्यस्मे तस्मा इन्द्रं प्रतिरमेम्यायुः ॥

The Mantra's transliteration in English

ṛdūdareṇa sakhyā saceya yo mā na riṣyed dharyaśva pītaḥ | ayaṁ yaḥ somo ny adhāyy asme tasmā indram pratiram emy āyuḥ ||

The Pada Paath (Sanskrit)

ऋ॒दू॒दरे॑ण । सख्या॑ । स॒चे॒य॒ । यः । मा॒ । न । रिष्ये॑त् । ह॒रि॒ऽअ॒श्व॒ । पी॒तः । अ॒यम् । यः । सोमः॑ । नि । अधा॑यि । अ॒स्मे इति॑ । तस्मै॑ । इन्द्र॑म् । प्र॒ऽतिर॑म् । ए॒मि॒ । आयुः॑ ॥

The Pada Paath - transliteration

ṛdūdareṇa | sakhyā | saceya | yaḥ | mā | na | riṣyet | hari-aśva | pītaḥ | ayam | yaḥ | somaḥ | ni | adhāyi | asme iti | tasmai | indram | pra-tiram | emi | āyuḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-048/mantra-rig-08-048-011

MANTRA NUMBER:

Mantra 11 of Sukta 48 of Mandal 8 of Rig Veda
Mantra 1 of Varga 13 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 167 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रगाथः काण्वः

देवता (Devataa) :- सोमः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अप॒ त्या अ॑स्थु॒रनि॑रा॒ अमी॑वा॒ निर॑त्रस॒न्तमि॑षीची॒रभै॑षुः । आ सोमो॑ अ॒स्माँ अ॑रुह॒द्विहा॑या॒ अग॑न्म॒ यत्र॑ प्रति॒रन्त॒ आयुः॑ ॥

The Mantra without meters (Sanskrit)

अप त्या अस्थुरनिरा अमीवा निरत्रसन्तमिषीचीरभैषुः । आ सोमो अस्माँ अरुहद्विहाया अगन्म यत्र प्रतिरन्त आयुः ॥

The Mantra's transliteration in English

apa tyā asthur anirā amīvā nir atrasan tamiṣīcīr abhaiṣuḥ | ā somo asmām̐ aruhad vihāyā aganma yatra pratiranta āyuḥ ||

The Pada Paath (Sanskrit)

अप॑ । त्याः । अ॒स्थुः॒ । अनि॑राः । अमी॑वाः । निः । अ॒त्र॒स॒न् । तमि॑षीचीः । अभै॑षुः । आ । सोमः॑ । अ॒स्मान् । अ॒रु॒ह॒त् । विऽहा॑याः । अग॑न्म । यत्र॑ । प्र॒ऽति॒रन्ते॑ । आयुः॑ ॥

The Pada Paath - transliteration

apa | tyāḥ | asthuḥ | anirāḥ | amīvāḥ | niḥ | atrasan | tamiṣīcīḥ | abhaiṣuḥ | ā | somaḥ | asmān | aruhat | vi-hāyāḥ | aganma | yatra | pra-tirante | āyuḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-048/mantra-rig-08-048-012

MANTRA NUMBER:
Mantra 12 of Sukta 48 of Mandal 8 of Rig Veda
Mantra 2 of Varga 13 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 168 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:
ऋषि: (Rishi) :- प्रगाथः काण्वः

देवता (Devataa) :- सोमः

छन्द: (Chhand) :- पङ्क्तिः

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

यो न॒ इन्दु॑: पितरो हृ॒त्सु पी॒तोऽम॑र्त्यो॒ मर्त्याँ॑ आवि॒वेश॑ । तस्मै॒ सोमा॑य ह॒विषा॑ विधेम मृळी॒के अ॑स्य सु॒म॒तौ स्या॑म ॥

The Mantra without meters (Sanskrit)
यो न इन्दुः पितरो हृत्सु पीतोऽमर्त्यो मर्त्याँ आविवेश । तस्मै सोमाय हविषा विधेम मृळीके अस्य सुमतौ स्याम ॥

The Mantra's transliteration in English
yo na induḥ pitaro hṛtsu pīto 'martyo martyām̐ āviveśa | tasmai somāya haviṣā vidhema mṛḻīke asya sumatau syāma ||

The Pada Paath (Sanskrit)
यः । न॒ः । इन्दु॑ः । पि॒त॒र॒ः । हृ॒त्ऽसु । पी॒तः । अम॑र्त्यः । मर्त्या॑न् । आ॒ऽवि॒वेश॑ । तस्मै॑ । सोमा॑य । ह॒विषा॑ । वि॒धे॒म॒ । मृ॒ळी॒के । अ॒स्य॒ । सु॒ऽम॒तौ । स्या॒म॒ ॥

The Pada Paath - transliteration
yaḥ | naḥ | induḥ | pitaraḥ | hṛt-su | pītaḥ | amartyaḥ | martyān | āviveśa | tasmai | somāya | haviṣā | vidhema | mṛḻīke | asya | su-matau | syāma

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-048/mantra-rig-08-048-013

MANTRA NUMBER:

Mantra 13 of Sukta 48 of Mandal 8 of Rig Veda
Mantra 3 of Varga 13 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 169 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रगाथः काण्वः

देवता (Devataa) :- सोमः

छन्द: (Chhand) :- पादनिचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

त्वं सो॑म पि॒तृभि॑: संविदा॒नोऽनु॒ द्यावा॑पृथि॒वी आ त॑तन्थ । तस्मै॑ त इन्दो ह॒विषा॑ विधेम व॒यं स्या॑म॒ पत॑यो रयी॒णाम् ॥

The Mantra without meters (Sanskrit)

त्वं सोम पितृभिः संविदानोऽनु द्यावापृथिवी आ ततन्थ । तस्मै त इन्दो हविषा विधेम वयं स्याम पतयो रयीणाम् ॥

The Mantra's transliteration in English

tvaṁ soma pitṛbhiḥ saṁvidāno 'nu dyāvāpṛthivī ā tatantha | tasmai ta indo haviṣā vidhema vayaṁ syāma patayo rayīṇām ||

The Pada Paath (Sanskrit)

त्वम् । सो॒म॒ । पि॒तृऽभिः॑ । स॒म्ऽवि॒दा॒नः । अनु॑ । द्यावा॑पृथि॒वी इति॑ । आ । त॒त॒न्थ॒ । तस्मै॑ । ते॒ । इ॒न्दो॒ इति॑ । ह॒विषा॑ । वि॒धे॒म॒ । व॒यम् । स्या॒म॒ । पत॑यः । र॒यी॒णाम् ॥

The Pada Paath - transliteration

tvam | soma | pitṛ-bhiḥ | sam-vidānaḥ | anu | dyāvāpṛthivī iti | ā | tatantha | tasmai | te | indo iti | haviṣā | vidhema | vayam | syāma | patayaḥ | rayīṇām

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-048/mantra-rig-08-048-014

MANTRA NUMBER:

Mantra 14 of Sukta 48 of Mandal 8 of Rig Veda
Mantra 4 of Varga 13 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 170 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रगाथः काण्वः

देवता (Devataa) :- सोमः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

त्रातारो देवा अधि वोचता नो मा नो निद्रा ईशत मोत जल्पिः । वयं सोमस्य विश्वह प्रियासः सुवीरासो विदथमा वदेम ॥

The Mantra without meters (Sanskrit)

त्रातारो देवा अधि वोचता नो मा नो निद्रा ईशत मोत जल्पिः । वयं सोमस्य विश्वह प्रियासः सुवीरासो विदथमा वदेम ॥

The Mantra's transliteration in English

trātāro devā adhi vocatā no mā no nidrā īśata mota jalpiḥ | vayaṁ somasya viśvaha priyāsaḥ suvīrāso vidatham ā vadema ||

The Pada Paath (Sanskrit)

त्रातारः । देवाः । अधि । वोचत । नः । मा । नः । निऽद्रा । ईशत । मा । उत । जल्पिः । वयम् । सोमस्य । विश्वह । प्रियासः । सुऽवीरासः । विदथम् । आ । वदेम ॥

The Pada Paath - transliteration

trātāraḥ | devāḥ | adhi | vocata | naḥ | mā | naḥ | ni-drā | īśata | mā | uta | jalpiḥ | vayam | somasya | viśvaha | priyāsaḥ | su-vīrāsaḥ | vidatham | ā | vadema

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-048/mantra-rig-08-048-015

MANTRA NUMBER:

Mantra 15 of Sukta 48 of Mandal 8 of Rig Veda
Mantra 5 of Varga 13 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 171 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- प्रगाथः काण्वः

देवता (Devataa) :- सोमः

छन्दः (Chhand) :- पङ्क्तिः

स्वरः (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

त्वं नः॑ सोम वि॒श्वतो॑ वयो॒धास्त्वं स्व॒र्विदा वि॑शा नृ॒चक्षाः॑ । त्वं न॑ इन्द ऊ॒तिभि॑: स॒जोषा॑: पा॒हि प॒श्चाता॑दु॒त वा॑ पु॒रस्ता॑त् ॥

The Mantra without meters (Sanskrit)

त्वं नः सोम विश्वतो वयोधास्त्वं स्वर्विदा विशा नृचक्षाः । त्वं न इन्द ऊतिभिः सजोषाः पाहि पश्चातादुत वा पुरस्तात् ॥

The Mantra's transliteration in English

tvaṁ naḥ soma viśvato vayodhās tvaṁ svarvid ā viśā nṛcakṣāḥ | tvaṁ na inda ūtibhiḥ sajoṣāḥ pāhi paścātād uta vā purastāt ||

The Pada Paath (Sanskrit)

त्वम् । नः॒ । सो॒म॒ । वि॒श्वतः॑ । व॒यः॒ऽधाः । त्वम् । स्वः॒ऽवित् । आ । वि॒श॒ । नृ॒ऽचक्षाः॑ । त्वम् । नः॒ । इ॒न्दो॒ इति॑ । ऊ॒तिऽभिः॑ । स॒ऽजोषाः॑ । पा॒हि । प॒श्चाता॑त् । उ॒त । वा॒ । पु॒रस्ता॑त् ॥

The Pada Paath - transliteration

tvam | naḥ | soma | viśvataḥ | vayaḥ-dhāḥ | tvam | svaḥ-vit | ā | viśa | nṛ-cakṣāḥ | tvam | naḥ | indo iti | ūti-bhiḥ | sa-joṣāḥ | pāhi | paścātāt | uta | vā | purastāt

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-049/mantra-rig-08-049-001

MANTRA NUMBER:

Mantra 1 of Sukta 49 of Mandal 8 of Rig Veda
Mantra 1 of Varga 14 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 172 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रस्कण्वः काण्वः

देवता (Devataa) :- इन्द्र:

छन्द: (Chhand) :- बृहती

स्वर: (Swar) :- मध्यमः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒भि प्र वः॑ सु॒राध॑सा॒मिन्द्र॑मर्च॒ यथा॑ वि॒दे । यो ज॑रि॒तृभ्यो॑ म॒घवा॑ पु॒रू॒वसुः॑ स॒हस्रे॑णेव॒ शिक्ष॑ति ॥

The Mantra without meters (Sanskrit)

अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे । यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥

The Mantra's transliteration in English

abhi pra vaḥ surādhasam indram arca yathā vide | yo jaritṛbhyo maghavā purūvasuḥ sahasreṇeva śikṣati ||

The Pada Paath (Sanskrit)

अ॒भि । प्र । वः॒ । सु॒ऽराध॑सम् । इन्द्र॑म् । अ॒र्च॒ । यथा॑ । वि॒दे । यः । ज॒रि॒तृऽभ्यः॑ । म॒घऽवा॑ । पु॒रु॒ऽवसुः॑ । स॒हस्रे॑णऽइव । शिक्ष॑ति ॥

The Pada Paath - transliteration

abhi | pra | vaḥ | su-rādhasam | indram | arca | yathā | vide | yaḥ | jaritṛ-bhyaḥ | magha-vā | puru-vasuḥ | sahasreṇa-iva | śikṣati

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-049/mantra-rig-08-049-002

MANTRA NUMBER:

Mantra 2 of Sukta 49 of Mandal 8 of Rig Veda
Mantra 2 of Varga 14 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 173 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रस्कण्वः काण्वः

देवता (Devataa) :- इन्द्र:

छन्द: (Chhand) :- पङ्क्तिः

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

श॒तानी॑केव॒ प्र जि॑गाति धृष्णु॒या हन्ति॑ वृ॒त्राणि॑ दा॒शुषे॑ । गि॒रेरि॑व॒ प्र रसा॑ अस्य पिन्वि॒रे दत्रा॑णि पु॒रुभोज॑सः ॥

The Mantra without meters (Sanskrit)

शतानीकेव प्र जिगाति धृष्णुया हन्ति वृत्राणि दाशुषे । गिरेरिव प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसः ॥

The Mantra's transliteration in English

śatānīkeva pra jigāti dhṛṣṇuyā hanti vṛtrāṇi dāśuṣe | girer iva pra rasā asya pinvire datrāṇi purubhojasaḥ ||

The Pada Paath (Sanskrit)

श॒तानी॑काऽइव । प्र । जि॒गा॒ति॒ । धृ॒ष्णु॒ऽया । हन्ति॑ । वृ॒त्राणि॑ । दा॒शुषे॑ । गि॒रेःऽइ॑व । प्र । रसाः॑ । अ॒स्य॒ । पि॒न्वि॒रे॒ । दत्रा॑णि । पु॒रु॒ऽभोज॑सः ॥

The Pada Paath - transliteration

śatānīkāiva | pra | jigāti | dhṛṣṇu-yā | hanti | vṛtrāṇi | dāśuṣe | gireḥ-iva | pra | rasāḥ | asya | pinvire | datrāṇi | puru-bhojasaḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-049/mantra-rig-08-049-003

MANTRA NUMBER:

Mantra 3 of Sukta 49 of Mandal 8 of Rig Veda
Mantra 3 of Varga 14 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 174 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रस्कण्वः काण्वः

देवता (Devataa) :- इन्द्र:

छन्द: (Chhand) :- विराड्बृहती

स्वर: (Swar) :- मध्यमः

THE MANTRA

The Mantra with meters (Sanskrit)

आ त्वा॑ सु॒तास॑ इन्द॑वो॒ मदा॒ य इ॑न्द्र गिर्वणः । आपो॒ न व॑ज्रि॒न्नन्वो॒क्यं१॒॑ सर॑: पृ॒णन्ति॑ शूर॒ राध॑से ॥

The Mantra without meters (Sanskrit)

आ त्वा सुतास इन्दवो मदा य इन्द्र गिर्वणः । आपो न वज्रिन्नन्वोक्यं सरः पृणन्ति शूर राधसे ॥

The Mantra's transliteration in English

ā tvā sutāsa indavo madā ya indra girvaṇaḥ | āpo na vajrinn anv okyaṁ saraḥ pṛṇanti śūra rādhase ||

The Pada Paath (Sanskrit)

आ । त्वा॒ । सु॒तासः॑ । इन्द॑वः । मदाः॑ । ये । इ॒न्द्र॒ । गि॒र्व॒णः॒ । आपः॑ । न । व॒ज्रि॒न् । अनु॑ । ओ॒क्य॑म् । सरः॑ । पृ॒णन्ति॑ । शू॒र॒ । राध॑से ॥

The Pada Paath - transliteration

ā | tvā | sutāsaḥ | indavaḥ | madāḥ | ye | indra | girvaṇaḥ | āpaḥ | na | vajrin | anu | okyam | saraḥ | pṛṇanti | śūra | rādhase

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-049/mantra-rig-08-049-004

MANTRA NUMBER:

Mantra 4 of Sukta 49 of Mandal 8 of Rig Veda
Mantra 4 of Varga 14 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 175 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रस्कण्वः काण्वः

देवता (Devataa) :- इन्द्र:

छन्द: (Chhand) :- निचृत्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒ने॒ह॒सं॑ प्र॒तर॑णं वि॒वक्ष॑णं॒ मध्व॒: स्वादि॑ष्ठमीं पिब । आ यथा॑ मन्दसा॒नः कि॒रासि॑ न॒: प्र क्षु॒द्रेव॒ त्मना॑ धृ॒षत् ॥

The Mantra without meters (Sanskrit)

अनेहसं प्रतरणं विवक्षणं मध्वः स्वादिष्ठमीं पिब । आ यथा मन्दसानः किरासि नः प्र क्षुद्रेव त्मना धृषत् ॥

The Mantra's transliteration in English

anehasam prataraṇaṁ vivakṣaṇam madhvaḥ svādiṣṭham īm piba | ā yathā mandasānaḥ kirāsi naḥ pra kṣudreva tmanā dhṛṣat ||

The Pada Paath (Sanskrit)

अ॒ने॒हस॑म् । प्र॒ऽतर॑णम् । वि॒वक्ष॑णम् । मध्व॑: । स्वादि॑ष्ठम् । ई॒म् । पि॒ब॒ । आ । यथा॑ । म॒न्द॒सा॒नः । कि॒रासि॑ । न॒: । प्र । क्षु॒द्राऽइ॑व । त्मना॑ । धृ॒षत् ॥

The Pada Paath - transliteration

anehasam | pra-taraṇam | vivakṣaṇam | madhvaḥ | svādiṣṭham | īm | piba | ā | yathā | mandasānaḥ | kirāsi | naḥ | pra | kṣudrāiva | tmanā | dhṛṣat

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-049/mantra-rig-08-049-005

MANTRA NUMBER:

Mantra 5 of Sukta 49 of Mandal 8 of Rig Veda
Mantra 5 of Varga 14 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 176 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रस्कण्वः काण्वः

देवता (Devataa) :- इन्द्र:

छन्द: (Chhand) :- भुरिग्बृहती

स्वर: (Swar) :- मध्यमः

THE MANTRA

The Mantra with meters (Sanskrit)

आ नः स्तोममुप द्रवद्धियानो अश्वो न सोतृभिः । यं ते स्वधावन्त्स्वदयन्ति धेनव इन्द्र कण्वेषु रातयः ॥

The Mantra without meters (Sanskrit)

आ नः स्तोममुप द्रवद्धियानो अश्वो न सोतृभिः । यं ते स्वधावन्त्स्वदयन्ति धेनव इन्द्र कण्वेषु रातयः ॥

The Mantra's transliteration in English

ā naḥ stomam upa dravad dhiyāno aśvo na sotṛbhiḥ | yaṁ te svadhāvan svadayanti dhenava indra kaṇveṣu rātayaḥ ||

The Pada Paath (Sanskrit)

आ । नः । स्तोमम् । उप । द्रवत् । हियानः । अश्वः । न । सोतृऽभिः । यम् । ते । स्वधाऽवन् । स्वदयन्ति । धेनवः । इन्द्र । कण्वेषु । रातयः ॥

The Pada Paath - transliteration

ā | naḥ | stomam | upa | dravat | hiyānaḥ | aśvaḥ | na | sotṛ-bhiḥ | yam | te | svadhāvan | svadayanti | dhenavaḥ | indra | kaṇveṣu | rātayaḥ

Link: www.vedakosh.com/rig-veda/mandal-8/sukta-049/mantra-rig-08-049-006

MANTRA NUMBER:

Mantra 6 of Sukta 49 of Mandal 8 of Rig Veda
Mantra 1 of Varga 15 of Adhyaya 4 of Ashtak 6 of Rig Veda
Mantra 177 of Anuvaak 6 of Mandal 8 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- प्रस्कण्वः काण्वः

देवता (Devataa) :- इन्द्र:

छन्द: (Chhand) :- निचृत्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

